Naveen Shodh Sansar (An International Refereed / Peer Review Multidisciplinary Research Journal)
RNI No.- MPHIN/2013/60638, ISSN 2320-8767, E- ISSN 2394-3793, Scientific Journal Impact Factor (SJIF)- 8.054,
April to June 2025, E-Journal, Vol. I, Issue L (50), ISO 9001:2015 - E2024049304 (QMS)

# भारतीयसंस्कृतेः तत्त्वचिन्तनम्

**डॉ. पंकज कुमार सिंह***

* साह. आचार्य (संस्कृत साहित्य) श्रीमती एल.डी.एस.पी.ए.एस.कॉलेज, बरुन्दनी (राज.) भारत

**प्रस्तावना - नमे स्तेनो जनपदे न कदर्यो न मद्यपः।**

**नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः॥(वेदे)**

सेयं वैदिकी संस्कृतिः सर्वोत्तमा प्रथमा संस्कृतिः इति वेदे संस्तूयते-

**सा प्रथमा संस्कृतिर्विश्ववारा। (यजु.7/14)**

भारतीयानामाचारव्यवहारसमाजराज्यव्यवस्था श्रुतिप्रामाण्यमूला विद्यते। ऐतरेय ब्राह्मणेशासनविषयिणी घोषणा वर्तते। यथा -**झ स्वस्ति। साम्राज्यं भौज्यं स्वाराज्यं वैराज्यंपारमेष्ठ्यं राज्यं महाराज्यं आधिपत्यमयं समन्तपर्यायो स्यात्, सार्वभौमः सार्वायुषःआन्ताद्, आपराधात् पृथिव्यै समुद्रपर्यन्ताया एकराड् इति।**

ब्राह्मणभागेषु विस्तरेण वैदिकी शासनप्रणाली- 1. साम्राज्यम्, 2. भोज्यम्, 3. स्वाराज्यम्,4.वैराज्यम्, 5.महाराज्यम्, 6. आधिपत्यम्, 7. सामन्तपर्यासा, 8. पारमेष्ठ्यम्, 9. जानराज्यम्,ब्रह्मचर्येण राजा राष्ट्रपुरुषो वा राज्याधिक्रियते। अत एव कौटिल्याचार्योऽपि सुखस्य मूलंधर्मः धर्मस्य मूलमर्थः अर्थस्य मूलं राज्यम् राज्यस्य मूलमिन्द्रियजयः तन्मूलं विनयःतन्मूलं वृद्धोपसेवेत्यादिकमुजहार।

सर्वे जनाः संस्कृतिपरिपालका भवन्तु इति निर्देष्टव्यम्। संस्कृतिपालनार्थमेव वस्तुतःकस्यापि देशस्य राष्ट्रस्य वास्तित्वम् उपयुज्यते, यतः कस्यापि देशस्य सर्वोच्चो यो निधिःस संस्कृतिः निधिः । वैदिक-आदर्शान् गृहीत्वा भारतीयसंस्कृतेः श्रद्धापरायणा अनुयायिनैः पोषकाश्च जायेरन्। अस्मिन् देशे प्रचलतां मतमतान्तराणां सम्प्रदायानाञ्च मूले स्थिरीभूयएषा निषीदति, अत एव सर्वेषामपि सम्प्रदायानां प्रतिपाद्यो विषयः एकः स एव यंभारतीयवैदिकसंस्कृतिः अभिनन्दति। भारतीयवैदिकसंस्कृतौ निष्कामकर्मवीचयः सर्वत्रउच्छलन्त्यः प्रवहन्त्यः च संलक्ष्यन्ते-

**तस्मादसक्तः सततं कार्यं कर्म सदाचर**

**असक्तोह्याचरन् कर्म परमाप्नोति पूरुषः॥**

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।**

**तस्मादस्मिन् सदायुक्तो नित्यं स्यादात्मवान् द्विजः॥(मनुस्मृ.1/108)**

संस्कृतभाषा भारतस्य अपूर्वा निधिः। वर्तमानराष्ट्रियचेतनायाः दृष्ट्यापि संस्कृतमेव सामान्यतः वर्धमानं दृश्यते। भारतीयसंस्कृतिः संस्कृतभाषायां संनिहिताः सन्ति। वर्तमान-समयेऽपि प्रशासनिकरूपेण अस्य देशस्य नाम स्वीकृतं वर्तते। परञ्च **सत्यमेव जयते**इति उपनिषद् वाक्यं सैद्धान्तिकरूपेण स्वीकृतं जातम्। **वन्देमातरम्, जनगणमन-** इतिराष्ट्रीयगीते **बकिमचन्द्रप्रणीतमेवं रवीन्द्रनाथकृतं प्रायेण संस्कृतपदैः** एव अन्वितं विद्यते। आकाशवाण्याप्रयुक्तः आदर्शवाक्यम् -**बहुजनहिताय बहुजनसुखाय**, दूरदर्शनेन **सत्यं शिवंसुन्दरम्** चिकित्सालयेषु **सर्वे सन्तु निरामयाः**, भारतीयजीवनवीमानिगमेन-**योगक्षेमंवहाम्यहम्**, जलसेनया-**शं नो वरुणः**, विदेशनीतेः **पञ्चशीलम्** एवं अनेकानि चआदर्शवाक्यानि एवमेव अन्यैरपि प्रशासनिक विभागैः स्वीकृतानि आदर्शवाक्यानि विद्वद्भिःप्रणीतेभ्यः संस्कृतग्रन्थेभ्यः उद्धृतानि विद्यन्ते। इत्थं ज्ञायते यत् **संस्कृतिर्मूलं संस्कृतम्**सर्वैः भारतीयजनैः समादृतं वर्तते।

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**

**ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥ (पुरुषसूक्ते)**

वेदानां वेदाङ्गानां च अध्ययनाध्यापनं, यजनयाजनं दानं प्रतिग्रहश्च ये जनाः कुर्वन्ति ते ब्राह्मणवर्णे समायान्ति। यथोक्तं मनुस्मृतेः एवं च गीतायाम् -

**अध्ययनाध्यापनं यजनं याजनं तथा।**

**दानं प्रतिग्रहश्चैव ब्रह्मकर्म स्वभावजम्॥ (मनु.1./175)**

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**

**ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥(गीता 18/42)**

देशस्य समाजस्य चसंरक्षणं क्षत्रियजनानां कर्त्तव्यम्। देशस्य जनतायाश्च मनोरञ्जन-

त्वादेव राजा राजते। यथोच्यते गीतायाम् -

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥(गीता 18/43)**

कृषिर्गोरक्षा वाणिज्यं च वैश्यवर्णानां प्रमुखं कार्यं विद्यते। **कृषिगौरक्ष्यवाणिज्यंवैश्यकर्म स्वभावजम्** (गीता 18/44), एतेषां वर्णत्रयाणां जनानां सेवाकार्यं शारीरिकश्चकार्यं शूद्रवर्णानां प्रधानं कृत्यं वर्तते। **परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्** (गीता 18/44), एवं स्वकार्यानुसारं जनाः स्ववर्णं समाश्रयन्ति।

**वैदिकसंस्कृतेः सामाजिकं जीवनम्** -वैदिक कालिकः समाजः पितृप्रधानः आसीत्।पिता एव सर्वेषां गृहाणां नेता पुरकर्त्ता च आसीत्। स्त्री- पुत्र-पुत्री -वध्वादीनां जीवनंतस्यैव छत्रच्छायायां सुखेन व्यतीतोऽभवत्। आर्य-दस्यु-भेदेन समाजः द्विधा विभक्तोऽभूत्।आर्याः आस्तिक- धार्मिक-सदाचारदिगुणसमन्विता अभवन्। दस्यवः नास्तिक-अधार्मिक-सदाचारादिरहिता शिल्पकर्मनिपुणाः अभवन्। ब्राह्मण-क्षत्रिय-वैश्यशूद्रप्रभेदेन समाजः वर्णचतुष्टये विभक्तः आसीत्। अध्ययन-अध्यापनं, यजनं याजनं च ब्राह्मणानां मुख्यं कर्म। देशरक्षा, राज्यसंचालनं, न्यायदण्डव्यवस्था च क्षात्रं कर्म। वाणिज्यं कृषि :- गोरक्षाच वैश्यानां कर्म। शिल्पविधानं सेवाकार्यं च शूद्राणां कर्म। समाजे नारीणां गौरवास्पदं स्थानमासीत्। वैदिकमन्त्रेषु वीरपुत्राणां प्रसूतये देवतानां भव्या प्रार्थना कृताऽस्ति यथा-

**यथाहं शत्रुहोऽसान्यसपत्न: सपत्नहा।**(अथर्ववेद-1/29/9)
विवाहकालस्य इयं प्रार्थनाऽस्ति -

**हे इन्द्रदेव! इमां स्त्रीं दशपुत्रासन् देहि-**
**दशस्यां पुत्रानाधेहि पतिमेकादशं कृधि।**

ऋग्वेदे स्वदुहितु: वरान्वेषणे सफलोऽभवत् -(ऋग्.10/85/45)
**पितानत्र दुहितु: सेकमृज्जन् संशगम्येन मनसादधन्वे।**(ऋग्.3/3/1/1)
**वैदिकसंस्कृते: आर्थिकं जीवनम्** - वैदिककाले आर्थिकजीवनस्य आधार: कृषि:,पशुपालनादिकं च उपलभ्यते। कृषिकर्मणि वृषभा: प्रायुज्यन्त। भूमिसेचनसाधनानि नदी-कूप- जलाशय-कुल्यादीनि अभूवन्। अन्नेषु गोधूम-यव- व्रीहि-चणक-माष-तिलादयो मुख्या:।

**धृति: क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रह:।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**(मनु.6/92)

जगद्धारकाणि मूलतत्त्वानि यमाख्यया व्याख्यातानि शास्त्रेषु धर्मपदवाच्यानि।
तदेवोच्यचते-

**धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजा:।**
**य: स्याद् धारणसंयुक्त: स धर्म इति निश्चय:।।**(योग.)

यमस्तु व्याख्याता योगदर्शने - अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा: (योग.2/30) अर्थात् अहिंसाया: समाश्रयम्, सत्यस्य पालनम्, अस्त्येयवृत्त्या आश्रय:, ब्रह्मचर्य-व्रतस्य अनुष्ठानम्, अपरिग्रहव्रतस्य पालनं च यम इत्युच्यते। जीवनस्य सर्वेषु क्षेत्रेषु धर्मस्य प्राधान्यं स्वीकरोति। अस्माद् कारणाद् एव आशावादस्य अपि प्रबलता वर्तते।

**तस्मादेता: सदा पूज्या भूषणाच्छादनाशनै:।**
**भूतिकामैर्नित्यं सत्कारेपूत्सवेषु च।।**(मनु.3/59)

योषिति सन्तुष्टिमुपागतायां प्रसन्नायां च सत्यां तत्कुलं रोचते वर्धते च। यथा-

**स्त्रियां तु रोचमानायां सर्व तद् रोचते कुलम्।**
**तस्यां त्वरोचमानायां सर्वमेव न रोचते।।** (मनु.3/62)

यत्र दम्पत्यो: सामञ्जस्यं परस्पर-सन्तुष्टिश्च तत्रैव कल्याणाधिवास:। यथा-

**सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।**
**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।** (मनु.3/6.)

स्त्रियो रत्नानि विद्या धर्मश्च यत्रैव प्राप्येरन्, तत एवोपादेयानि। यथा-

**स्त्रियो रत्ना यथो विद्या धर्म: शौचं सुभाषितम्।**
**विविधानि च शिल्पानि समादेयानि सर्वत:।।**(मनु. 2/24.)

अस्माकं धर्मशास्त्रे: अपि स्त्रिय: समस्तास्तव देवि भेदा: इति वचनानुसारेणसर्वा स्त्रिय: महन्मायाया: आद्याशक्ते: स्वरूपेणैव प्रतिपादिता:। पुराकाले स्त्रिय: गृहिणी,गृहस्वामिनी, सहधर्मिणी, इत्यादिभि: विशेषणै: सम्बोध्यन्ते स्म।

**रामायण-महाभारतकाले नारीणां स्थिति:-**रामायण-महाभारतकाले नारीणांशिक्षाया: सुव्यवस्था अवलोक्यते। रामायणे कौशल्या तारा च 'मन्त्रविदौ' कथ्येते। सन्ध्याकुर्वन्त्या जानक्या: वर्णनं प्राप्यते। महाभारते सुलभा वेदान्तविद् वर्ण्यते, द्रौपदी च 'पण्डिता' कथ्यते। नारीणां संगीतनृत्यादिकलानां शिक्षणं वर्ण्यते, अर्जुन उत्तरां तद्वहे एव संगीत-नृत्यादिकम् अध्यापयामास। रामायणे एकपत्नीव्रतं प्रतिपाद्यते। महाकाव्यकाले नारीणांगौरवं प्रतिष्ठितम् आसीत्। महाभारते वर्ण्यते यत् सत्कृता नार्येव साक्षात् लक्ष्मीर्भवति।महाभारते नारीणां गौरवं प्रति निम्नश्लोक: उद्धृत: -

**अर्धभार्या मनुष्यस्य भार्या श्रेष्ठतम: सखा।**
**भार्यामूलं त्रिवर्गश्च भार्या मूलं तरिष्यत:।।**
**भार्यावन्त: क्रियावन्त: सभार्या गृहमेधिन:।**
**भार्यावन्त: प्रमोदन्ते भार्यावन्त: श्रियान्वित:।।**
**सखाय: प्रविविक्तेषु भवन्त्येता: प्रियंवदा: ।**
**पुरा नार्य: पुरुषतुल्यमधिकारान् लेभिरे।।** (महाभारत)

अस्मिन् संसारे अनेकविधा जना: सन्ति। केचित् परोपकारिण: केचित् परोपतापिन:भवन्ति। परोपकारिण: सज्जना: एव सर्वेषां प्राणिनां हिताय तडागकूपादीन् खनयन्ति,उद्यानानि आरोपयन्ति, धर्मशालां पाठशालां च निर्मापयन्ति। परोपकारिणं परोपकारेणैवप्रसन्ना भवन्ति। यथा श्रोत्रं विद्यया तथैव पाणिर्दानेन, न तु कङ्कणेन विभाति। यथा-

**श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।**
**विभाति काय: करुणापराणां परोपकारैर्न तु चन्दनेन।।**(नीति. 1/72)

परोपकारिण: स्वशरीरस्यापि त्यागं कृत्वा परेषां रक्षां कुर्वन्ति। दधीचि: स्वस्यअस्थीनि दत्वा देवानां रक्षां कृतवान्। राजाशिवि: स्वमांसं दत्वा कपोतस्य रक्षा अकरोत्।रन्तिदेव: क्षुधार्तोऽपि स्वभोजनं चाण्डालाय समर्पितवान्। दिलीप: परोपकारभावनया एवस्वशरीरं सिंहाय प्रदत्तवान्। एवमेव परोपकारी दिवङ्गतोऽपि यश: शरीरेण सदैव जीवति। अतो सर्वे परोपकारिण: भवेयु:। उक्तं च-

**धनानि जीवितं चौव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्तो वरं त्यागो विनाशे नियते सति।।**(हितो.1/44)
**परोपकार: कर्त्तव्य: प्राणैरपि धनैरपि।**
**परोपकरणं पुण्यं न स्यात् क्रतुशतैरपि।।**(पद्म.उ.22)
**वदनं प्रसादसदनं सदयं हृदयं सुधामुचां वाच:।**
**करणं परोपकारकरणं येषां केषां न ते बन्द्या:।।** (सु.र.भा. 47/1.3)

महाकवि श्रीहर्षदेवप्रणीते 'नागानन्दम्' नाम नाटके जीमूतवाहनो नाम नायक: एतादृश:जन: एव स: स्व शरीरमपि शङ्खचूडस्य नाम जनस्य कृते दत्वा असीम आनन्दअनुभवति। एतादृशा: जना: वस्तुत: मानवताया: कृते रत्नतुल्या एव भवन्ति। वध्यशिलायांस्थित्वा स: जीमूतवाहन: चिन्तयति एवम्-

**न तथा सुखयति मन्ये मलयवती मलयचन्दनस्सार्दा।**
**अभिवाञ्छितार्थसिद्धयै वध्यशिलेयं यथा स्पृहा।।**(नागानन्दम्)

समाजशास्त्रस्य अद्वितीया कृतिरस्ति। मन्वत्रिविष्णुहारीतादि स्मृतय: विंशति: सन्ति।, देवल-चन्द्रायण-कपिलादिभिश्च विरचिता: स्मृतय: पञ्चाशत् सन्ति। आहत्य सप्तति स्मृतयस्सन्ति।
धर्मलक्षणे **स्वस्य च प्रियमात्मन:** इत्यनेन मधुरभाषणं परोपकरणम् अहिंसनं चसमर्थयते। यथा महाभारते प्रोच्यते-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चौवावधार्यताम्।**
**आत्मन: प्रतिकूलानि परेषां न समाचरेत्।।**(महाभारतम्)

**न धर्मात् परमं मित्रम्** - संसारे धर्म एव सर्वोत्कृष्टं मित्रम्। सुखे दु:खे च अजस्रंसाहाय्याचरणेन धर्म: परम: सुहृत्। सुखसाधनेन धर्मस्य परमबन्धुत्वं परममित्रत्वं च व्यादिश्यते।कथ्यते च-

**एक एव सुहृद् धर्मो निधनेऽप्यनुयाति य:।**
**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति।।**

**धर्म: स नो यत्र न सत्यमस्ति**-सत्यं धर्मस्य मूलम्। सत्याश्रयैव धर्मवृत्ति:।

यत्र सत्यं तत्र धर्मः, तदभावे तदभावः। सर्वे वेदगताः विषयाः धर्मशास्त्रेऽस्मिन् प्रतिपादिताः।वेदस्तु 1. कर्मकाण्ड – 2. ज्ञानकाण्ड–भेदेन द्विधा विभज्यते। वेदेषु विवाह वर्णाश्रम–पुत्रभेद–उत्तराधिकारिनिर्णय– धनविभाग–श्राद्धादिविषयकाः बहवः प्रसङ्गा उपलभ्यन्ते। ते प्रसङ्गा–श्च कालक्रमेण धर्मशास्त्रस्य विषयीभूताः। प्राधान्येन धर्मप्रतिपादकान्येव शास्त्राणि स्मृति–पदेनोच्यन्ते। आचारमूलकस्य सत्याहिंसादिरूपस्य धर्मस्य सर्वधर्मेषु समत्वम् अनिवार्यत्वंच व्यादिश्यते, तत्पालने न कस्यचिदपि विपश्चितो विप्रतिपत्तिः। एवं धर्मो मानवं देवत्वंगमयति।

**धर्मो धारयते प्रजाः**–कर्त्तव्याकर्त्तव्ययोः अवधारकरूपो शास्त्रम् धर्म इति कथ्यते।

संसारे धर्म एवं प्रजानां धारकः। धर्मस्य विश्वजनीत्वं सार्वलौकिकत्वं सार्वभौमिकत्वं चविश्वहितसम्पादनादेव प्रवर्तते। धर्म एव शिक्षयति–

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।** (शा.प. 273)
**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात्।।**(शिष्टगृहीत)

अतएव सत्यं दया परोपकारादयो धर्मस्य मूलतत्त्वानि गण्यते।परदुःखनिवारणंकरुणाद्रवत्वं च धर्मे संगृह्यते। यथोच्यते **–न च धर्मो दयापरः**

**न धर्मवृद्धेषु वयः समीक्ष्यते**–ज्येष्ठत्वं श्रेष्ठत्वं च धर्ममूलकम्। **धर्मस्य त्वरितागतिः** इत्यनेन ज्ञायते यत् धर्मे देशकालानुरूपं परिवर्तनं संजायते।

**गृहीत इव केशेषुमृत्युना धर्ममाचरेत्।**
**यतोऽभ्युदयनिःश्रेयससिद्धिःस धर्मः।**(वैशेषिक)

एवं धर्मो मानव–लोकपारित्रायकः, समुन्नतिसाधकः, ज्ञान–विज्ञान शौर्यादि गुण–सम्पादकः, आस्तिक्यादि गुणानां प्रवर्तकश्चेति। मानवजीवने धर्मस्य सर्वदा सर्वथा चअनिवार्यत्वं वर्तते तस्याश्रयेणैव ऐहिकम् आमुष्मिकं च सुखमवाप्यते अमरसिंहस्तु विश्वधर्मः धारयति, जनाः धर्म धारयन्तीति धर्मशब्द व्युत्पादितवान। मेदनी–हेमकोषयोस्तु

**पुण्यार्थे धर्मशब्दः प्रयुक्तः।**

**धर्मेण हीनाः पशुभिः समानाः**–ईश्वरसत्तायां विश्वासमेव धर्मः निगदन्ति। धर्म एव जीवनस्य सारः। ये गुणाः असमान् मानवान् पशुपक्षिकीटादयेभ्यः पृथक् कुर्वन्ति

तेषामेव सामान धर्म इति। उक्तं च भर्तृहरिणा–

**अहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिः नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।**(हितो. 1/25)

उपरिकथिताः गुणाः प्रायः सर्वेषु प्राणिषु बहुधा अवलोक्यन्ते। पुराकाले अस्माकं देशे अनेके धर्मपरायणाः आसन्, यैः धर्मपालनायैव स्वराज्यपुत्रधनादिकं सर्व याचकेभ्यःददौ। राजा हरिश्चन्द्रः स्वप्ने दृष्टेभ्यः याचकप्रवरेभ्यः विश्वामित्रेभ्यः समादत्तावानासीत्।सम्प्रति अपि समाजे देशे बहवः सत्यसेवकाः सन्ति ये सततं धर्माचरणे संलग्नाः दरीदृश्यन्ते।तैरपि धर्मफलम् अभिलषणीयम् प्रापणीयञ्च। यथोच्यते–

**धर्मस्य फलमिच्छन्ति धर्म नेच्छन्ति मानवाः।**
**पापस्य फलं नेच्छन्ति पापं कुर्वन्ति यत्नतः।।**

एवं च ये तु सुखप्राप्तये अन्यायेन धनोपार्जनं कुर्वन्ति ततः सुखं कामयन्ते तान्प्रतिकिं वयं पुनरुक्तिं चरितार्थयामः। तेषां कृते प्राचीनामिमामेव सूक्तिं समुद्धरामः–

**अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति।**
**प्राप्ते त्वेकादशे वर्षे समूलञ्च विनश्यति।।** (चा.नी.15/6)
**कृधी न ऊर्ध्वान् चरथाय जीवसे।**(ऋग्.1/36/14)
**उच्छ्रयस्व महते सौभगाय ।** (अथर्व.3/12/2)

सदाचारेण मानवजीवनस्य सर्वविधा उन्नतिः भवति। सदाचारस्य सद्वृत्तात्वस्य च मानवजीवने आवश्यकं वर्तते। सद्वृत्तिः, सम्यग्दृष्टिः, सम्यक् सम्बोधश्च संस्कृतौ स्वीकृता भवन्ति। यथोक्तं मनुना–

संस्कृत भाषायां **वसुधैव कुटुम्बकम्**–भावना–सम्बद्धाः श्लोकाः बहवः सन्ति।वैदिककालात् आरभ्य आधुनिक–संस्कृतकालपर्यन्तं सर्वत्र एतादृशाः कौटम्बिकी भावनाः विलसन्त्येव। संस्कृतभाषां विना विश्वे इतरभाषासु कुत्रापि ईदृशी लोकोत्तरभावना न परिदृश्यते। उदारचेताः विश्वमेव कुटुम्बमिव भावयन्ति। संस्तभाषायाः विश्वबन्धुत्व–भावना एषैव वर्त्तते। समाजे विश्वे यानि भूतानि सन्ति, तानि आत्मवत् भावयन्तु। विद्यमानाःसर्वे सुखिनः स्युः, सर्वे निरोगिनः भवन्तु, कोऽपि दुखं न प्राप्नुयात्। विश्वे अथवा ब्रह्माण्डे ये प्राणिनः सन्ति ते सुखिनः भवन्तु, यथा–

**अयं निजः परो वेति गणनालघुचेतसाम्।**
**उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।**(शा.प.273)
**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात्।।**

**संदर्भ ग्रंथ सूची :–**

1. संस्कृत साहित्य का इतिहास – बलदेव उपध्याय
2. वृहदारण्यकम्
3. पुरूष सूक्त
4. यजुर्वेद
5. मनुस्मृति

**************